# रासलीलाके प्रकार

दि. २६/०४/२०१४


| | | |
|---|---|---|
| १. | ब्रह्मानंदात्मिका | प्रकटानंदात्मिका |
| २. | लीलानंदात्मिका | |
| ३. | अवतारलीलात्मिका | प्रकट/तिरोहित आनंदात्मिका |
| ४. | भजनीयानंदात्मिका | तिरोहितानंदात्मिका |
| ५. | भजनानंदात्मिका | |

।।विरहानुभवैकार्थसर्वत्यागोपदेशकाय नमः।। ।।भक्त्याचारोपदेष्ट्रे नमः।। ।।कर्ममार्गप्रवर्तकाय नमः।। ।।यागादौ भक्तिमार्गैकसाधनत्वोपदेशकाय नमः।।

दि. २७/०४/२०१४

रूपस्य रूपाणां स्वार्थत्वात् / परार्थत्वात् तु नाम्नाम्

नामप्रयोजने संप्रदायभेदाः
- → स्वरूपनिरूपणार्थ
- → लीलानिरूपणार्थ
- → कर्तव्योपदेशार्थ




| | |
|---|---|
| **B** | Biosphere |
| **T** | Troposphere |
| **S** | Stratosphere |
| **M** | Mesosphere |
| **T** | Thermosphere |
| **E** | Exosphere |
| **G** | Geosphere |

१) यद्यपि भगवत्सामर्थ्यम् अनन्तं तथापि सद्बुद्ध्या धर्मार्थकाममोक्षा एव साध्या: इति कार्यं चतुर्विधम् (त.दी.नि.३ ।४ ।२)

२) धमार्थकाममोक्षाख्यं कार्यं कृष्णांघ्रिसेवया सिद्धयेत् सर्वजीवानां नान्यथेत्यस्य संभव: (त.दी.नि.३ ।४ ।४)

३) स एवं सर्वं करोति... उत्पत्तिविनाशौ यथाकथंचिदपि भवत: स्थितौ तु सर्वा कृति: अपेक्ष्यते इति स्वत: परमेश्वरादेव फलं नांशत:... (तत्रैव.प्र.३ ।४ ।२७)

४) अविद्यमानपूर्व: स्याद् अर्थ: ... विद्यमाने तु विषये काम: (तत्रैव. ३।४ ।८४)

५) सत्संगे सर्वविज्ञाने त्यागसाधनसेवया अतिनिष्ठां गतस्यैव भक्ति: भवति नान्यथा : सत्संगे जाते तदुपदेशेन सर्वतत्त्वविज्ञाने च जाते त्यागसाधनानां फलाननुसन्धानेन कृततया यथोक्तकर्माणां ब्रह्मसात्करणात् दोषदर्शनपूर्वकं विषयानासक्ति–प्रभृतीनां सेवया निरन्तरकरणेन वैराग्ये जातेऽपि भगवदाज्ञापरिपालनाय तदधीनतया सर्वकरणेन अतिशयितां निष्ठां प्राप्तस्यैव भक्ति: भवति (तत्रैव. ३ ।४ ।१४४)

६) रूपं तदेव स रसो बहुकालं न सेवित: अत: स्वतन्त्रा सा नाभूत् कारणत्वेन च उद्गता. (तत्रैव. ३ ।४ ।१५०)

## <u>ज़ेन मतानुसार</u>

Shun: Can you get the TAO and possess?

Chung: You  don’t possess your body so how can you possess TAO  (Chuangtzu )


## <u>इकबाल</u>

‘‘अपनी आराईशे हस्तीपे यूं नाज़ां न हो. तू तो है तस्वीरे महेफिल और तेरी महेफिल है वो’’

।।विरहानुभवैकार्थसर्वत्यागोपदेशकाय नमः।। ।।भक्त्याचारोपदेष्ट्रे नमः।। ।।कर्ममार्गप्रवर्तकाय नमः।। ।।यागादौ भक्तिमार्गैकसाधनत्वोपदेशकाय नमः।।

सच्चिदानंदात्म ब्रह्मके तीन आयाम

दि. २७/०४/२०१४




## क. (तादात्म्येनोपक्रमः)

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम् ।।१ ।।
पुरुषएवेदं सर्वं यद् भूतं यच्च भव्यम् ।।
उतामृतत्वस्येशान यदन्नेनातिरोहति ।।२ ।।
एतावानस्य महिमा अतो ज्यायाश्च पुरुष ।।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३ ।।
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवात् पुनः ।।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ।।४ ।।

## ख. (समष्ट्या यज्ञरूपता)

तस्माद् विराडजायत विराजो अधि पूरुषः ।।
स जातो अत्यतिरिच्यत पश्चाद् भूमिमथो पुरः ।।५ ।।
यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः ।।६ ।।
सप्तास्यासन् परिधयः त्रिः सप्त समिधः कृताः ।।
देवाः यद्यज्ञं तन्वानाः अबध्नन् पुरुषं पशुम् ।।७ ।।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।।
तेन देवाः अयजन्त साध्या ऋषयश्च ये ।।८ ।।

## ग. (व्यष्ट्या तत्त्वरूपता)

तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।। याज्य द्रव्यता
पशुस्ताश्चक्रे वायव्यान् आरण्यान् ग्राम्यांश्च ये।।९।।
तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।। यागमन्त्र
छन्दासि जज्ञिरे तस्मात् यजुस्तास्मादजायत।।१०।।
तस्मादश्वा अजायन्त ये के चोभयादतः।। तदुपलब्धि नैरन्तर्य
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः।।११।।
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते।।१२।।

## घ. (विविधनामरूपलीलात्मकता)

ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः।। Social
ऊरू तदस्य यद्वैश्यः पद्भ्या शूद्रो अजायत।।१३।।
चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत।। Astronomical
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।।१४।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।। Geographical
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोका अकल्पयन्।।१५।।
वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णंस्तमसस्तु पारे।। लीलानिरूपयन्तोपसंहार
सर्वाणि रूपाणि विचत्य धीरः नामानि कृत्वाऽभिवदन् यदास्ते।।१६।।

## ङ. (प्रमाणादिचतुष्टयी)

धाता [प्रमाण] पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः।।
तमेवं [प्रमेय] विद्वान् [साधन] अमृत इह [फल] भवति नान्यः पन्था अयनाय विद्यते।।१७।।

## च. (उपसंहार)

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः।।१८।।

अद्भ्यः सम्भूतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताधि ।।
तस्य त्वष्टा विदधद्रूपमेति तत्पुरुषस्य विश्वमाजानमग्रे ।।१९ ।।

## छ. (स्तुति)

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात् ।।
तमेवं विद्वानमृत इह भवति नान्य पन्था विद्यतेऽयनाय ।।२० ।।
प्रजापतिश्चरति गर्भे अन्तः अजायमानो बहुधा विजायते ।।
तस्य धीराः परिजानन्ति योनिं मरीचीनां पदमिच्छन्ति वेधसः ।।२१ ।।
यो देवेभ्य आतपति यो देवानां पुरोहितः ।।
पूर्वो यो देवेभ्यो जातः नमो रुचाय ब्राह्मये ।।२२ ।।
रुचं ब्राह्मं जनयन्तः देवा अग्रे तदब्रुवन् ।।
यस्त्वेवं ब्रह्मणो विद्यात् तस्य देवा असन् वशे ।।२३ ।।
ह्रीश्च [स्वरूपेणतिरोभावत्वात्] ते लक्ष्मीश्च [सामर्थ्येन आर्विभूत] पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपम् ।।
अश्विनौ व्यात्तम् इष्टं मनिषाण अमुं मनिषाण सर्वं मनिषाण ।।२४ ।।

[१]कारणान्वेषिणे कारणतारूपमेव तद् उपलक्ष्यते.

[२]कर्तव्यनिर्धारणान्वेषिणे तपोयज्ञादिरूपमेव ब्रह्म उपलभ्यते.

[३]आनन्दान्वेषिणे लीलाविशिष्टं तत्त्वम् उपलभ्यते.

१). कारणान्वेषणे यद् न कारणं नापि कार्यं तद् असदिव भवति ''असद् वा इदम् अग्रे आसीत् ततो वै सद् अजायत. स आत्मानं स्वयम् अकुरुत'' इति श्रुतिप्रतिपन्नाः. बौद्धाः पुनः तद् असदेव इति.

२). अलौकिके त्रयस्त्रिंशद् देवाः सृष्टाः यज्ञं साधयन्ति. लौकिकेऽपि अष्टाविंशति तत्त्वानि + चतुर्विधभूत (उद्भिज्जस्वेदज अण्डज जरायुज) कालः चेति त्रयस्त्रिंशत् तत्त्वानि द्रव्याणि. देवद्रव्ययोः इतरेतरार्थता


‘‘सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः
अनेन प्रसविष्यध्वम् एष वो अस्तु इष्टकामधुक् .
देवाः भावयता अनेन ते देवाः भावयन्तु वः
परस्परं भावयन्तो श्रेयः परम् अवाप्स्यथ
इष्टान् भोगान् हि वो देवाः दास्यन्ते यज्ञभाविताः
तैः दत्तान् अप्रदायैभ्यो यो भुंक्ते स्तेन एव सः
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बषैः
भुञ्जते ते त्वघं पापा ये पचन्ति आत्मकारणात्
अन्नाद् भवति भूतानि पर्जन्याद् अन्नसम्भवः
यज्ञाद् भवति पर्जन्यो यज्ञकर्मसमुद्भवः
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः
अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति ( भगवद्गीता ३।१०–१६ )

इति सृष्टेः यज्ञक्रियारूपता–तपोज्ञानरूपतापि सो अकामयत ‘बहुस्यां प्रजायेय’इति स तपो अतप्यत स तपः तप्त्वा इदं सर्वमसृजत यदिदं किञ्च तत् सृष्ट्वा तदेव अनुप्राविशत् तदनुप्रविश्य सच्चत्यच्चाभवत्... भृगुर्वै वारुणिः वरुभं पितरमुपससार अधीहि भगवो ब्रह्म इति तस्मा एतत् प्रोवाच अन्नं प्राणं चक्षु श्रौत्र मनो वाचमिति... यतो वा इमानि भूतानि जायन्ते तानि जीवन्ति यत्प्रयन्ति अभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म स तपो अतप्यत स तपः तप्त्वा अन्नं ब्रह्म इति व्यजानात् ( तैति.उप. २–३ )

भागवते सृष्ट्यादौ ब्रह्मणे तपसः उपदेशः ‘‘जन्माद्य यस्य यतोन्वयादितरतः चार्थेषु अभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ( भाग.मंग.१।१।१ ). अतएव देवद्रव्यात्मके जगति धर्म–ज्ञान संभवः तत्र स्वरूपैक्यावस्थायां अदेवद्रव्यात्मिकायां अनृतमिव भवति इति श्रुतिशरणाः बौद्धादयस्तु अनृतमेव)


आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते... आनन्दं प्रयन्ति अभिसंविशन्ति तद् विजिज्ञासस्व तद्. असद् वा इदमग्र आसीत् ततो वै सद् अजायत तद् आत्मानं स्वयम् अकुरुत तस्मात् तत् सुकृतम्


उच्यते. रसो वै स: . रसह्येवायं लब्ध्वा आनन्दी भवति... सैषा आनन्दस्य मीमांसा भवति. आनन्दं ब्रह्मणो विद्वान न बिभेति कुतश्चन. एतं ह वाव न तपति किम् अहं साधु नाकरवं किम् अहं पापम् अकरवम् इति (तैति.उप) अत: आनन्दोपभोक्ता/भोग्य-अभाव असदिव श्रुतिवादिनां बौद्धानान्त रागद्वेषातीतं शून्यमेव तत्त्वम् .





दि. २८/०४/२०१४

**<u>विरह :</u>** एकस्य परापेक्षस्य विभक्तयो द्वयोर्वा स्वरूप-कार्य-प्रयोजन सम्पत्ति निर्वाहाय या अपेक्षा स विरह:







‘‘न जातु कामात् न भयाद् न लोभाद् धर्मं त्यजेद् जीवितस्यापि हेतो:’’ वचनोक्त अत्याज्य धर्मको मूल

दि. ३०/०४/२०१४



## श्रुत्यानुसार धर्म, अर्थ,काम, मोक्ष

**१. धर्म:** स वै नैव रेमे. तस्माद् एकाकी न रमते स द्वितीयमैच्छत्. स हैतावानास. यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेव आत्मानं द्वेधापातयत् ततः पतिश्च पत्नी चाभवताम्. तस्माद् इदमर्धवृगलमिव स्व इति ह स्माह याज्ञवल्क्यः तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत्. ततो मनुष्या अजायन्त. सा हेयमीक्षांचक्रे कथं नु म आत्मनएव जनयित्वा सम्भवति हन्त तिरोसानि इति सा गौरभवत् ऋषभ इतर... एवमेव यदिदं किञ्च मिथुनमा पिपीलिकाभ्यः तत् सर्वमसृजत. सो वेद अहं वाव सृष्टिरस्म्यहं हीदं सर्वमसृक्षीति ततः सृष्टिरभवत् सृष्ट्यां ह अस्य एतस्यां भवति य एवं वेद (बृह.उप.१।४।३-५)

**२. अर्थ:** तद्ध इदं तर्हि अव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियत 'असौ नामायमिदंरूप'इति स इह प्रविष्टः. आनखाप्रेभ्यो यथा क्षुरः क्षुरधाने अवहितः स्याद् विश्वंभरो वा विश्वंभरकुलाये तंह न पश्यन्ति. अकृत्स्नोहि स प्राणन्नेव प्राणो नाम भवति. वदन् वाक् पश्यन् चक्षुः...(बृह.उप.१।४।७)

**३. काम:** ब्रह्म वा इदम् अग्रे आसीत् तद् देवानसृजथ... सृष्टवा एषु लोकेषु आरोहयत् (विभज्यारोहयत्) अस्मिन् लोके अग्निं वायुमन्तरिक्षे. दिवि सूर्यम् अथ यो अतः उर्ध्वलोकाः तेषु ताः देवता तदा आरोहयत्. अथ ब्रह्मैव परार्थम् अगच्छत्. तत् परार्थं गत्वा एक्षत् कथन्तु इमान् लोकान् अवेदाम्. तद् द्वाभ्यामेव प्रत्यवेद रूपेण चैव नाम्ना चैव. स यस्य कस्यचन नाम अस्ति तन्नाम. यस्यापि नाम नास्ति यद् वेद रूपेण इति. तद् एते ब्रह्मणो महती अभ्वे एतावद् इदं सर्वं यद् रूपं चैव नाम च तत् सर्वम् आप्नोति सर्व वा अक्षय्यम्.

**४. मोक्ष:** (a) ब्रह्म वा इदमग्रे आसीत्. (b) तद् आत्मानमेवावेद 'अहं ब्रह्मास्मि'इति तस्मात् सर्वमभवत्. (c) तद् यो देवानां ऋषीनां मनुष्यानां प्रत्यबुद्धयत... (d) इदं सर्वं भवति.